UGC - CARE LISTED

ISSN-2321-7626
Vol. XXXIX, Year XI
फरवरी – अप्रैल 2024

# पाणिनीया
# PĀṆINĪYĀ

त्रैमासिक - सान्दर्भिक - पुनरीक्षितशोधपत्रिका
(Quarterly Refereed and Reviewed Research Journal)

महर्षिपाणिनिसंस्कृत-एवं-वैदिकविश्वविद्यालयः, उज्जयिनी (म.प्र.)

**UGC - CARE Listed**

Vol. XXXIX, Year XI
ISSN-2321-7626
फरवरी - अप्रैल 2024

# पाणिनीया
# PĀṆINĪYĀ

त्रैमासिक-सान्दर्भिक-पुनरीक्षितशोधपत्रिका
(Quarterly Refereed and Reviewed Research Journal)

**महर्षिपाणिनिसंस्कृत-एवं-वैदिकविश्वविद्यालयः**
**देवासमार्गः, उज्जयिनी, मध्यप्रदेशः, भारतम्**

**अणुसङ्केतः** (E-mail) - mpsvv.paniniya@gmail.com
**अन्तर्जालपुटम्** (Website) - www.mpsvv.ac.in

**प्रधानसम्पादकः**
प्रो. विजयकुमारः सी.जी.
माननीय; कुलगुरुः

**प्रबन्धसम्पादकः**
डॉ. तुलसीदासपरौहा
सह-आचार्यः विभागाध्यक्षश्च
संस्कृतसाहित्यविभागः

**सम्पादकः**
डॉ. अखिलेशकुमारद्विवेदी
सहायकाचार्यः प्र. विभागाध्यक्षश्च
व्याकरणविभागः

**सह-सम्पादकः**

**डॉ. उपेन्द्रभार्गवः**
सहायकाचार्यः प्र. विभागाध्यक्षश्च
ज्योतिषविभागः

**डॉ. शुभम् शर्मा**
सहायकाचार्यः प्र. विभागाध्यक्षश्च
ज्योर्तिज्ञानषविभागः

**डॉ. पूजा उपाध्यायः**
सहायिकाऽऽचार्या प्र. विभागाध्यक्षश्च
विशिष्टसंस्कृतविभागः

**डॉ. संकल्पमिश्रः**
सहायकाचार्यः प्र. विभागाध्यक्षश्च
वेदविभागः

**प्रकाशकः**
कुलसचिवः
महर्षिपाणिनिसंस्कृतवैदिकविश्वविद्यालयः, उज्जयिनी (म.प्र.)

**सदस्यताशुल्कम्**

वार्षिकम् - 3000/-
प्रत्यङ्कम् मूल्यम् - 725/- डाकव्ययः 50/-

# कुलपतिसन्देशः

महतो मोदस्य विषयः यत् त्रैमासिक्याः सान्दर्भिकशोधपत्रिकायाः **पाणिनीये**'त्यस्याः 39 तमोऽङ्कः पाठकानां करकमलेषु विराजते। अधुना भारते नवीनशिक्षानीत्यनुसारं शिक्षणं जायते । अस्मिन् प्रायोगिकशिक्षायाः महत्त्वं वरीवर्ति । व्यवहारेणैव प्राप्तशिक्षायाः प्रकर्षो भवति उक्तमपि महाभाष्ये **चतुर्भिश्च प्रकारैर्विद्योपयुक्ता भवति आगमकालेन स्वाध्यायकालेन प्रवचनकालेन व्यवहारकालेन च** आचारस्य शिक्षायाः कृते नितरां शोधस्य आवश्यकता समाजे विद्यते। विविधविद्यायाः शोधलेखानां पत्रिका शिक्षाविद्भ्यः नवदृष्टिं प्रददेदिति कल्पये । अस्याम् अनुसन्धानपत्रिकायां येषां विदुषां, शोधार्थिनां च शोधनिबन्धाः प्रकाश्यन्ते ते सर्वेऽपि अभिनन्द्यन्ते। सद्विद्यायाः उपासनं सर्वदा करणीयम् एतेन परम्परायाः विचितरङ्गन्यायेन प्रवर्धनं जायते । शिक्षणकेन्द्राणि एव समाजाय सुनीतिसहितां युक्ताचारां विद्याञ्च प्रदाय सुराष्ट्रं कर्तुं शक्नुवन्ति। अत एव पुराकालादाराभ्य अद्यावधिः शिक्षालयाः प्रासङ्गिकाः सन्ति। महर्षिभर्तृहरेः वाक्यपदीयस्य वचनं स्मरणीयम् -

**विधातुस्तस्य लोकानामङ्गोपाङ्गनिबन्धनाः ।**
**विद्याभेदाः प्रतायन्ते ज्ञानसंस्कारहेतवः॥** 1/10

इयं पत्रिका नूनं हि शिक्षायाः उद्देश्यस्य पूर्तिं विधास्यती'त्याशासे ।

विदुषां वशंवदः
**प्रो. विजयकुमारः सी.जी.**
कुलपतिः

# सम्पादकीयम्

अयि सहृदयदयाः। विश्वविद्यालस्य शोधपत्रिकायाः पाणिनीयायाः एकोनपचत्वारिंशोऽङ्कः (39) भवता समक्षे समायाति।

वेद-व्याकरण-साहित्यः दर्शनादि विषयैः निबद्धा पत्रिकेयं नूनं हि विदुषां मनोरञ्जनपुरस्सरं ज्ञानवर्द्धन करिष्यतीति मदीयं चिन्तनम् । त्रयः प्रभागाः सन्त्यस्यामिति प्रथितम् संस्कृतस्य, हिन्द्याः, आङ्गलस्य च आद्ये व्याकरणशास्त्रीयौ द्वौ लेखौ प्रकाशितौ, वेदस्य एकः शोधनिबन्धः चत्वाराः लेखाद्व साहित्यस्य सन्ति। हिन्दी प्रभागे सप्त शोधालेखाः वर्तन्ते।

वेदविषस्यैकः दर्शनस्य द्वौ लेखौ तत्रयो लेखाः साहित्यस्य सन्ति । आङ्गलप्रभागे अष्टौ शोधालेखाः विलसन्ति। यत्र सप्त लेखाः दर्शनान्वितः एकश्च ज्यौतिषशास्त्रस्य विद्यते ।

अधुना भारतीयज्ञानपरम्परायाः विषये भारतीयविद्वांसः शास्त्रनिष्कमताः अहर्निशं चिन्तयन्तियत् सर्वाः विद्याः संस्कृतवाङ्मयो निहिताः सन्ति तर्हि कथं केनोपायेन वा निमज्जनोज्जनैः तासां विद्यानां प्रकाशः जायेत। तत्र पाणिनीया समा शोधपत्रिका सहायकङ्गनोपतिष्ठते । वस्तुतः बहूनां ग्रन्थानां मार्गदर्शकनाश्च अवलोकनेन श्रवणेन - निदिध्यासेन वा एकः शोधनिबन्धः नवीनीतसमः उद्भवति। तदनन्तरमेव सः छात्राणां ज्ञानवर्द्धनाय भारतस्य च गौरवाय भवति। तानाम इति धिया -

इयं पत्रिका विदुषां मनसि राराज्यतां शोधछात्राणा वैदुष्यं वर्धयतां भारतस्य मान समेधरातामिति भावनया भवानीपति भगवन्तं महाकालेश्वरं प्रार्थये ।

विदुषां चञ्चरीकः
**डॉ. अखिलेश कुमार द्विवेदी**
अध्यक्ष (प्र.)
व्याकरण विभागः

# अनुक्रमणिका

**संस्कृत-प्रभागः**

1. ध्वन्यालोकलोचने प्रतिभाविशेषः 1
**डॉ. शुकदेव वाजपेयी**

2. शब्दकौस्तुभदिशा तत्पुरुषसमासलक्षणस्य नञ्तत्पुरुषसमासे समन्वयप्रकारः 6
**शंखशुभ्र-गच्छितः**

3. संस्कृतकाव्यवाङ्मये पर्यावरणसुरक्षाप्रसङ्गे एका समीक्षा 13
**भोलेश्वरप्रधानः**

4. काठकानाम् अग्निचयनस्वरूपम् 21
**जयकिशन नैनानीः**

5. वासुदेवनामानः दक्षिणभारतीयाः संस्कृतकवयः - एकः परिचयः 28
**श्रीमन्दिर साहु**

6. उच्चारणार्थकवर्णानां निवृत्तिविचारः 34
**डॉ. शंभुनाथभट्टः**

**हिन्दी-प्रभागः**

7. वेदों में परिस्थितिकी प्रबंधन 42
**डॉ. दीप्ति वाजपेई**
**मोनिका सिंघानिया**

8. तत्त्वानुसन्धान में मुक्ति विमर्श 53
**साक्षी**

9. योग साधना में सत्य का विशिष्ट योगदान 59
**चारु मेहता**
**महाबीर शुक्ल**
**प्रो. नीरु नत्थानी**

10. पंडित सांवरमल शास्त्री द्वारा रचित काव्य में सामाजिक चेतना 68
**राकेश कुमार गोरा**

11. आलङ्कारिकों के मतानुसार काव्य प्रयोजन 75
**सोनिका देवी**
**डॉ. सुदामा सिंह यादव**

12. योगवसिष्ठ में निर्दिष्ट जीवन-मूल्य 81
**डॉ. दीप्ति वाजपेयी**
**अनामिका**

**आङ्गल-प्रभागः**

13. Flora and Fauna in the Srimad Bhagavad Gita and Abhijnanashakuntalam: Environmental Perspectives 91
**Brijesh Kumar Sahu**
**Dr. Naveen Kumar Mehta**

14. Religious Syncretism and Cultural Exchange: Exploring the Hindu-Christian Encounter in 19th Century India 97
**Dr. Soumyajit Sen**
**Pampa De**

15. Factors That Determine Longevity in Astrology 107
**Dr. N.A.Shihab**
**Dr. Ratheesh K.R.**

16. Stress Management Including Yoga, Meditation and Relaxation Techniques 118
**Monika Devi**
**Dr. Parameswarappa S. Byadgi**

17. Enhancement of Life Force (Prana Shakti) and Awakening of Willpower through Pranayama - A Review 126
**Pragya Sahu**
**Dr. Narendra Shanker Tripathi**

18. Description of Meditation in Upanishad 132
**Garima Patel**
**Prof. Sangeeta Gehlot**

19. Women in Ancient India: Insights from the Vedas 138
**Anamika Shukla**

20. Theological Perspectives of Kavi Karnapura in Caitanyacandrodaya 148
**Radhakrishnan. P**
**Prof. Remadevi.V**

21. Eco-Aesthetic Studies Based on Uttararāmacarita of Bhavabhūti. 153
**Rakendhu. K.S.**
**Prof. Remadevi. V.**

22. The Aesthetic Experience of Abhijñānaśākuntalam 161
**Theresa Corona**
**Prof. Remadevi. V.**

**UGC - CARE Listed** Vol. XXXIX, Year XI
ISSN- 2321-7626
फरवरी - अप्रैल 2024

# ध्वन्यालोकलोचने प्रतिभाविशेषः

**डॉ. शुकदेव वाजपेयी***

***सारांशः -*** *ध्वन्यालोक इति ग्रन्थः आचार्य-आनन्दवर्धनस्य विद्यते तत्र आचार्य-अभिनवगुप्तस्य लोचननाम्नी टीका लिखितास्ति। तत्र अभिनवगुप्तेन स्ववैदुष्येन अनेकतथ्यानां विस्पष्टीकरणं कृतं विद्यते। अत्र प्रतिभाशब्दं व्याख्यायन् अभिनवाचार्योः निगदति - प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा, तस्या रसावेशवैशद्यसौन्दर्यकाव्य-निर्माणक्षमत्वम् । एवं च प्रतिभायाः कथं विश्लेषणं वैशिष्ट्येन च प्रतिपादनमभिनवगुप्ताचार्येण कृतमिति किंचित् द्रष्टव्यम् ।*
***कूटशब्दः -*** *प्रतिमा, ध्वनिः, प्रतीयमानम् ।*

आनन्दवर्धनाचार्यकृत-ध्वन्यालोकग्रन्थे लोचनटीकायाम् आचार्याभिनवगुप्तेन प्रतिभायाः निरूपणं प्रकारद्वयेन कृतम् - एकस्तु ध्वन्यालोके पठितप्रतिभाशब्दस्य सन्दर्भोचितव्याख्यारूपे। अपरश्च स्ववचसि। ध्वन्यालोके काव्यार्थः वाच्यार्थातिरिक्तप्रतीयमानार्थरूपेऽपि प्रतिपादितोऽस्ति। महतां कवीनां सरस्वत्यां अयमेवार्थः निष्यन्दति येन एका विशिष्टा प्रतिभा अभिव्यक्ता भवति। प्रतीयमानार्थकारणेनैव काव्ये स्पृहणीयता, उपादेयता आयातीति ध्वन्यालोकारेण निगदितम् -

**योऽर्थः सहृदयश्लाघ्यः काव्यात्मेति व्यवस्थितः।**
**वाच्यप्रतीयमानाख्यौ तस्य भेदावुभौ स्मृतौ।।**

*सह-आचार्य स्वामी विवेकानन्द विश्वविद्यालय, सागर (म.प्र.)

**तत्र वाच्यः प्रसिद्धो यः प्रकारैरुपमादिभिः।**
**बहुधा व्याकृतः सोऽन्यैस्ततो नेह प्रतन्यते॥**
**प्रतीयमानं पुनरन्यदेव वस्त्वस्ति वाणीषु महाकवीनाम्।**
**यत्तत्प्रसिद्धावयवातिरिक्तं विभाति लावण्यमिवांगनासु॥**
**काव्यस्यात्मा स एवार्थस्तथा चादिकवेः पुरा।**
**क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः॥**
**सरस्वती स्वादु तदर्थवस्तु निष्यन्दमाना महतां कवीनाम्।**
**अलोकसामान्यमभिव्यनक्ति परिस्फुरन्तं प्रतिभाविशेषम्॥**[1]

अत्र प्रतिभाशब्दं व्याख्यायन् अभिनवाचार्यः निगदति- प्रतिभा अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा, तस्या रसावेशवैशद्यसौन्दर्यकाव्यनिर्माणक्षमत्वम्। अत्र आनन्दवर्धनाचार्यस्य भाषायाः स्पष्टीकरणं विद्यते, यथा वक्तुं शक्यते - महतां कवीनां सरस्वती तत्प्रतीयमानार्थरूपं स्वादु वस्तु निष्यन्दमाना सती महतां कवीनामलोकसामान्यं प्रतिभाविशेषं परिस्फुरन्तम् अभिव्यनक्ति। अत्र प्रतिभा कारणरूपा अस्ति प्रतीयमानार्थश्च तस्य कार्यमिति। अस्य कारणकार्यपुष्टौ अभिनवगुप्तेन भट्टनायकस्य वाक् धेनुः, रसश्च तस्य दुग्धमित्याधायकं ललितमधुरं वचनमुद्धृतम् - निष्यन्दमानेति। यदाह भट्टनायकः -

**वाग्धेनुर्दुग्ध एतं हि रसं यद् बालतृष्णया।**
**तेन नास्य समः स स्याद् दुह्यते योगिभिर्हि यः॥**

कविता रसावेशेन भवति अतस्तस्मात्प्राप्तः यः रसः सोऽपि निष्पन्नरसावेश एव। नाट्यस्य काव्यस्य वा नायके रसावेशो भवति। नायकस्य कवेः श्रोतुश्च अनुभूतिः समाना एव भवति, अत्र अभिनवगुप्तः उपाध्यायभट्टतौतस्य वचनमुद्धरति - नायकस्य कवेः श्रोतुः समानोऽनुभवस्तथा। ततोऽग्रे अभिनवगुप्तः 'अभिव्यनक्ति' इति पदं व्याख्याति। सहृदयाः प्रतीयमानार्थस्य अनुभवमभिव्यंजनया कुर्वन्ति नानुमानेन, अपि च प्रतीयमानार्थः सहृदस्य हृदये स्फुरति। अभिनवगुप्तेनेह - 'येनास्मिन्नतिविचित्रकविपरम्परावाहिनि संसारे कालिदासप्रभृतयो द्वित्राः पंचषा वा महाकवय इति गण्यन्ते' इति न ध्यायति। अत्र प्रतिभारूपिकरणस्य काव्यरसरूपिकार्येणानुमानं कर्तुं शक्यते। स्वरूपलक्षणरूपे अभिनवगुप्तस्य वक्तव्यद्वयमुपलभ्यते -

1. अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा प्रतिभा।[2]
2. शिवा प्रतिभा -

**यदुन्मीलनयुक्त्यैव विश्वमुन्मीलति क्षणात्।**
**स्वात्मायतनविश्रान्तां तां वन्दे प्रतिभां शिवाम्॥**[3]

एवं च प्रतिभायाः अपरं स्वरूपलक्षणं भवति - अविलम्बेन विश्वोन्मीलकत्वे सति, स्वात्मायतनविश्रान्तत्वे च सति शिवात्मं प्रतिभात्वम् । अपूर्ववस्तुनिर्माणक्षमा इति द्वितीयलक्षणेपि गणयितुं शक्यते किन्तु प्रज्ञा शिवा इत्यंगीकरणं नोचितम् , यतोहि शिवा परमेश्वरी विद्यते यया प्रज्ञा जायते। शिवाकृते न किंचिदपूर्वम् । अपूर्वत्वं तु सहृदयदृष्ट्या भवति।

यदुन्मीलितम्, इत्यत्र युक्तिपाठः वैचित्र्य वैविध्यं च जनयति। विश्वमवश्यं विचित्रम् । शैवशास्त्रानुसारमिह कारणम् ईशचित्रार्थस्याभासेच्छा - मूलं च तस्याश्चित्रार्थभासाविष्कृतिरीशितुः। आनन्दवर्धनेनापि वैविध्यस्य वैचित्र्यस्य च प्रयोजिका प्रतिभा इति मत्वा युक्तिशब्दं प्रयुनक्ति -

**ध्वनेर्यः सगुणीभूतव्यंग्यस्याध्वा प्रदर्शितः।**
**अनेनानन्त्यमायाति कवीनां प्रतिभागुणाः॥**
**अतो ह्यन्यतमेनापि प्रकारेण विभूषिता।**
**वाणी नवत्वमायाति पूर्वार्थान्वयवत्यपि॥**
**युक्त्याऽनयाऽनुसर्तव्यो रसादिर्बहुविस्तरः।**
**मितोऽप्यनन्ततां याति काव्यमार्गो यदाश्रयात् ॥**[4]

वृत्तावपि आनन्दवर्धनेन युक्तिशब्दस्य प्रयोगः कृतः लिखितश्च तत्र - बहुविस्तरोऽयं रसभावतदाभासतत्प्रशमनलक्षणो मार्गो यथास्वं सर्वम् एवाऽनया युक्त्याऽनुसर्तव्यः। अभिनवगुप्तः प्रतिभामपि शक्तिरिति स्वीकरोति -

**अव्युत्पत्तिकृतो दोषः शक्त्या संव्रियते यया।**
**यस्त्वशक्तिकृतस्तस्य स झटित्यवभासते॥**[5]

अत्र शक्तिशब्दं व्याख्यायमानः लोचने अभिनवगुप्तः लिखति - शक्तिः प्रतिभानम् , वर्णनीयवस्तुनूतनोल्लेखशालित्वम् ।

पण्डितराजजगन्नाथेन प्रतिभाया अन्यतमकारणभूता शक्तिरित्युक्तम् । यद्यपि तेन शक्तिशब्दस्य कृते अदृष्टशब्दस्य प्रयोगः कृतः। एतमेवाभिप्रायं अभिनवगुप्तः 'अपूर्ववस्तुनिर्माणक्षमा प्रज्ञा' शब्देन प्रकटयति। निर्माणक्षमता मम्मटाद्यनुसारं शक्तावपि विद्यते, नव्यन्यायस्य सूक्ष्मेक्षिकाधारे पण्डितराजानुसारं शक्तिजन्यप्रतिभायामपि। उभये सम्प्रदाये प्रतिभा कवौ अस्ति न वा इति अनुमानेन ज्ञास्यते, कार्येण कारणस्यानुमानम् । अभिनवगुप्तस्य तान्त्रिकसम्प्रदायः यदा प्रतिभां शिवा इति कथयति तदा सः नैवानुमानमपितु साक्षात्काररूपप्रत्यक्षं प्रतिभायाः साधकप्रमाणं कथयिष्यति। शिवा शिवस्याभिन्ना शक्तिरेव। यथा सकलसृष्टेः सा कारणीभूता तथैव काव्यकलासृष्टेरपि। सा च स्वातन्त्र्यशक्तिरपि कथ्यते। 'चितिः स्वतन्त्रा विश्वसिद्धिहेतुः' इति दार्शनिकानामपि

सिद्धान्तः। शिवायाः परावागपि विद्यते। अभिनवगुप्तः लोचने परापश्यन्तीमध्यमावैखरीं वाचं प्रणमति अपि च शक्तीनां गणना वैखरीमाध्यमेन आरभते। प्रख्यास्ति कविप्रतिभा, सा आनन्दवर्धनेन कविताविशेषे परिस्फुरिता इति कथयति अतः आनन्दवर्धनदृष्ट्या विचारः वैखरीमाध्यमेन आरभ्यते। अभिनवगुप्तः लोचने श्रीतन्त्रालोके च प्रतिभां पराशक्तिरूपेणापि स्वीकरोति -

**नौमि चित्प्रतिभां देवीं परां भैरवरूपिणीम् ।**

**मातृ-मान-प्रमेयांश-शूलाम्बुज-कृतास्पदाम् ।।**[6]

भैरवस्य तात्पर्यम् परमशिवः, सः स्वतन्त्रो भवति अतः परा अपि स्वतन्त्रास्ति। यतो हि परा चिद्रूपो विद्यते अतः प्रतिभापि चिद्रूपा तिष्ठति। प्रतिभा विशेषतः काव्यप्रतिभा चेतनप्राणिषु भवति अतः प्रतिभा चिद्विलासाप्यस्ति, तया प्रकाशितं काव्यमति प्रतिभा अपौरुषेयं चास्ति। अभिनवगुप्तेन तन्त्रशास्त्रीयग्रन्थेषु शिव-शिवा-प्रतिभा एते त्रयः अभिन्ना एव इत्युक्तम् । लोचने प्रतिभायाः प्रतिपादने पक्षद्वयं विद्यते एका सा प्रतिभा या चराचरात्मकबाह्यसृष्टेः हेतुभूतास्ति, अपरा च यया कविता उच्छलिता भवति, या च अपूर्वस्तुनिर्माणेन परिचीयते। 'यदुन्मीलन' श्लोके प्रतिभायाः विश्वनिर्माणक्षमतास्ति।

कवितायाः निर्माणभूमिमभिनवगुप्तः एवं रेखांकयति -

**वस्तुतः शिवमये हृदि स्फुटं सर्वतः शिवमयं विराजते।**

**नाशिवं क्वचन कस्यचिद् वचस्तेन वः शिवमयीं दशा भवेत्।।**[7]

कवितायाः शिवमयत्वं हृदये स्फुटितं तदा तस्य एकाक्षरमपि अशिवत्वन्नैति शिवमयमेव तद्भवति। कवितायाः सहृदयपाठकोपि शिवदशां प्राप्नोति।

आनन्दवर्धनस्य ध्वन्यालोकटीकालोचने अभिनवगुप्तः निश्चितरूपेण अभिहितान्वयमार्गमंगीकरोति। यत्र ते स्वतन्त्रा आसन् तत्र अन्विताभिधानी अपि दृश्यते। अभिनवगुप्तस्य रसनिरूपणेपि एषैव स्थितिः - यत्र ते भरतस्य रससूत्राणां व्याख्यां करोति तत्र ते विभाव-अनुभाव-संचारीभाव-सात्विकभाव-स्थायीभावादि-घटकान् विचारयति यत्र च ते स्वतन्त्राः सन्ति तत्र शिवो रसः अथवा रसः शिवः इत्येव रससूत्रं तेषां भवति। अभिनवभारत्याः प्रथमाध्यायस्य मंगलपद्येनैतत् स्पष्टं भवति -

**यस्तन्मयान् हृदयसंवदनक्रमेण द्राक्चिशक्तिगणभूमिविभागभागी।**

**हर्षोल्लासत्परिकवारजुषः करोति वन्देतमां तमहमिन्दुकलावतंसम् ।।**[8]

सप्तमाध्यास्य अभिनवभारत्याः मंगलपद्येति -

**स्थायी प्रबुद्धहृदये व्यभिचारभूतः कामाकुलासु जनतासु महानुभावः।**

**अन्तर्विभावविषयो रसमात्रमूर्तिः श्रीमान् प्रसन्नहृदयोऽस्तु मम त्रिणेत्रः।।**[9]

एवं च आनन्दवर्धनकृत-ध्वन्यालोकस्य लोचनटीकायां अभिनवगुप्तः प्रतिभायाः विशेषरूपेण व्याख्यानं करोति। अभिनवगुप्तस्य लेखनी स्वतन्त्रास्ति। सः कमपि अभिप्रायं केनापि प्रकारेण कथयन् दृश्यते। शैवशास्त्रे तेषां यत् प्रभूतवाङ्मयं विद्यते तेनैतत् सिध्यति। परं साहित्यक्षेत्रे प्रतिभानिरूपणेनापि एतत् प्रमाणीभवति।

**सन्दर्भाः**


1. ध्वन्यालोके 1.2-6
2. ध्वन्यालोके 1.6
3. प्रथमोद्योतस्य लोचनस्यान्तिमं मंगलाचरणम्
4. ध्वन्यालोके 4.1-3
5. ध्वन्यालोके 3.6
6. ध्वन्यालोके 1.2
7. लोचनस्य चतुर्थोद्यतस्यान्तिमं पद्यम्
8. अभिनवभारती 1.1
9. अभिनवभारती 7.1

**UGC - CARE Listed** Vol. XXXIX, Year XI
ISSN- 2321-7626
फरवरी - अप्रैल 2024

# The Aesthetic Experience of Abhijñānaśākuntalam

**Theresa Corona* & Prof. Remadevi. V. ****

**Abstract :** Kālidāsa was one of the greatest poets and dramatist in the Indian classical literature, who carved out his distinct space. Śākuntalam was his one of his masterpiece; there is hardly anyone unfamiliar with Kālidāsa and his work. "Śākuntalam" is a seven-act play that encapsulates the essential aesthetic sense of Kālidāsa, evident in the narrations, word arrangement, characteristic features, poetic sensibility, depiction of prakṛti and the profound connection between human and nature. The play effectively showcases these elements as aesthetic tools.
**Keywords :** Kālidāsa, Śakuntala, Duṣyanta, Rasa, Aesthetic views.

**Introduction**

India is a land of extensive knowledge and many source, the language Sanskrit was one of the most valuable contributionsto the world. The language Sanskrit is considered as a divine language because of its completion and perfection. The language opened a wide area of knowledge before the world. The language not only spread its fragrance in the aspect of knowledge but also in the aspect of literature and arts, among them one of the most reachable ones was the Abhijñānaśākunthalam of Kālidāsa. The Western literary world knew India with this remarkable theme.

Abhijñānaśākuntalam of Kālidāsa is a very popular drama all over the world. The Indian classical literary world is known to the Western by the name of a Kālidāsa and Śakuntala. There will not be any

* Research Scholar, Department of Sanskrit
** Professor Dept. Of SanskritMaharaja's College, Ernakulam

library without a copy of Śākuntalam that much of fame it has been made just because of the intellectual approach of the great Kālidāsa. He is a well-known poet and dramatist. The personal details regarding still as Kālidāsa mystery, but most scholars agreehe belongs to the fourth century B.C.E.

**Through the Drama.**

Śākuntalam is a seven-act play. It is a love story of King Dushyanta and Śakuntala,the plot has been taken from the Mahābhārata, in Mahābhārata the story in the precursor lineages of Pāṇdava and Kauravas. In Mahābhārata the story of Śākuntala and Duṣyanta they meet in the forest and gets estranged and finally reunites.

The author made a lot of changes from the actual story and it really made the play sobeautiful, Kālidāsa brought the changes of his own aesthetic sense in each line of the story. Mostly the approaches can be visible in every part of the story oneof the amazing entryofDuṣyanta itself shows it as like the introductionof Śakuntala, the scenes of Kaṇva, the love life, marriage, separation stage, the strong bond between Śakuntalawith her friends, the role of Gautami, the role of Vidūṣaka, the court session, truth realization, depression stage, final reunion etc… really made the play appreciable even nowadays.

In Mahābāratam Vyāsa ascribes the story of bold Śakuntala, but when it comes to Kālidāsa's era he made the character even more delicate we can see the representation bold Śakuntala in to *mughdha nāyika* who holds all the innocents and purity of the deep forest, a beauty who is not able to think beyond her hermitage and forest.

All these is just clear that it is really needed for the period when it comes to Kālidāsa's era. One of the most important characters was Duṣyanta the hero in the play Kālidāsa brought the *Dhirodātta* the bold and brave Duṣyanta.Kālidāsa used his aesthetic sense completely in the introductory scene of duṣyanta. He glorifies the entry of Duṣyantacompares to lord Śiva.

कृष्णसारे ददच्चक्षुस्त्वयि चाधिज्यकार्मुके ।
मृगानुसारिणं सक्षात्पश्यामीव पिनाकिनम् ॥[1]

Here Kālidāsa used the word पनिाकनिम् to denote lord *Śiva* it is just enough to show the aesthetic sense of his arrangements and selection of vocabularies, as it is already said that Kālidāsa was a poet as well as a dramatist so he just used his poetic sense too in his dramas.

The statement is just clear when we go through each line of *Śākunthalam* it is really marvelous in its all sense. There is a saying, Sanskrit dramas are really goodfor reading not for play,those whoread the *Śākunthalam* can say that, such a kind of literary treat is *Śākuntalam*.

The next aesthetic part in the play is the describing of atmosphere and the surroundings of hermitage.

नीवाराः शुकगर्भकोटरमुखभ्रष्टास्तरुणामघः प्रस्निग्धाःक्वचिदिङ्गुदीफलभिद सूच्यन्तएवोपला ।
विश्वासोपगमादभिन्नगतय शब्दसहन्ते मृगास्तोयाधारपथाश्च वल्कलशिखानिष्यन्दरेखाङ्किता ।।[2]

The *sloka* expresses the exact picture of the hermitage, the lines like which leads the reader to the real image. After this scene the king meets Śakuntala with a hidden viewat the first sight itself the king fallen for her beauty, Kālidāsa tells of her beauty here through *slokas*, at the same time he given the hints regarding the heroine, her birth story,the information about her parents etc…Here Kālidāsa introduces the characters like *Anasooya and Priyaṃvada* the two main strong characters in the play, Kālidāsa added these two characters to the story which really boosted the entire story so well. They are the actual guiders of Śakuntala, they two have a very pure intension towards Śakuntala in many of the situations they are the decision makers and through them Śakuntala looking the world. Author clearly presents a deep bonding of friendship in the play.

**सरसिजमानुविद्धं शैवलेनापि रम्यं मलिनमपि हिमांशोर्लक्ष्म लक्ष्मीं तनोति।**
**इयमधिकमनोज्ञा वल्कलेनापि तन्वी किमिव हि मधुराणां मण्डनं नाकृतीनाम् ।।**[3]
**अधरः किसलयरागः कोमलविटपानुकरिणौ बाहू ।**
**कुसुममिव लोभनीयं यौवनमङ्गेषु सन्नद्धम् ।।**[4]

In these slokas he describes the elegance of Śakuntala, it is clear that Śakunthala is a very young women who is not that much known about the outer world and people. The first act ends here,the most aesthetic parts in the play was this first part.

The second act starts with the tiredness of king Duṣyantabecause of his romance towards Sakuntala. Here Kālidāsa introduces the most interesting character on the play Vidūshaka, the one who handles the emotions of the king as his own. Vidhushaka handles a very important role in the play the character catches serious and humorous part in the story. The main role of Vidūshaka comes in the sixth act here he just takes the orders of the king Dushyanta and leaves. In the second act Kālidāsa beautifully creates the situation of Dushyanta who is not able to do any kind of royal activities and acts like a very normal person who is suffering because of the untold love affection of him towards the heroine. Kālidāsa describes the tiredness and distracted Dushyanta really well,

In the third act they both expresses their love towards each other and getting married according to the Gāndhaṛva form of marriage. The third act starts with the conversation of Anasūya and Priyaṃvada they

both were talking about the Śakuntala and Duṣyanta,here Kālidāsa placed them near to the lotus pond for Sakuntala was really weak because of the erotic gods (कामदेवः) approach on her.

The slokas explains the aesthetic sense of prakṛti (nature) and erotic feeling, it is already said that Śākuntalam is a love story the main *rasa* in the play is erotic (Srinkara). Kālidāsa Śākuntalam follows most of the directives in the text Naṭyasastra, as per the Naṭyakāra the plays should hold the*Śṛngāra* or *Vīra rasa* here used this erotic *rasa* or *Śṛngāra* mainly in the play, and he very well used this Kālidāsa opportunity to show his aesthetic approach on the rasa. The slokas in the third act is really showing the erotic *rasa* on its peak.

The fourth act is mostly considered as the most emotional act in the play the characters like Kaṇva, Gautami, the young sage like Śārngarava, Anasūya, Priyaṃvada, even the animals and nature itself acts on the play. Here the intellectual monuments are clear visible than the aesthetic sense. The rasa in this act is mostly karuna, the emotional approach of Kaṇva towards his beloved daughter is very well presented by,Kālidāsa more than a sage here shown the love and care of a father who is sending his daughter to husband's house. The slokas like

यस्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया कण्ठः स्तम्भिततबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।
वैक्लव्यं मम तावदीदृशमिदं स्नेदरण्यौकसः पीडयन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः।।[5]
शुषुषस्व गुरून् कुरु प्रियसखीवृतिंसपत्नीजनेभर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भवदक्षिणापरिजने भाग्येष्वनुत्सेकिनीयान्त्येवं गृहिणीपदं युवतयोवामाः कुलस्याधयः।।[6]

अर्थो हि कन्या परकीय एव तामद्य संप्रेष्यपरिग्रहीतुः।
जातो ममायं विशदः प्रकामं प्रत्यर्पितन्यास इवान्तरात्मा ।।[7]

shows the exact picture of a father rather than the sage, he expresses his love and pampering towards the daughter Kaṇva gives the best advices for Śakuntala at the same time he is not even able to talk by the pain he holds with her leaving. Kālidāsa shown thekarunarasa in its peak to create the atmosphere at the same time the act is well known by its, aesthetic sense on prakriti. Kālidāsa is always famous for his approach towards prakṛti and its nurture. In the fourth act he is well described thebeauty of nature and its connection with the heroine. There are many slokas which explains the inner connection of the heroine with nature which expresses herlove towards nature and animals.

यस्य त्वया व्रणविरोपणमिङ्गुदीनां तैलं न्यषिच्यत मुखे कुशसूचीविद्धे ।
श्यामाकमुष्टिपरिवर्धितको जहाति सोऽयं न पुत्रकृतकः पदवीं मृगस्ते ।।[8]

The fourth act is also carries the curse on Śakuntala, in the modern sense we can say the twist in the play occurs in this act, after sending Śakuntala thefourth act ends.In the fifth act the curse affects Duṣyanta,

rendering him unable to remember his beloved Śakuntala.So he rejects her before the court. HereKālidāsa shown his aesthetic sense on describing the emotion of Śakuntala towards Duṣyanta at the same time helpless situation too.The picturization of a court, the anger, rejection, debates everything well explained in the play.

In the fifth act beginning when Śakuntala enters in to the court she gets the attention of everyone over there, even the king is also says

का स्विदवगुण्ठनवती नातिपरिस्फुटशरीरलावण्या ।
मध्ये तपोधनानां किसलयमिव पाण्डुपत्राणाम् ॥[9]

Here the king is not able to remember his love but at the same time he is so much excited to know about the lady who is standing in front of him, these lines shown how curious the king was. After this scene the drama is enters in to an entirely different way, very crucial and emotional moments could be seemed. The hero completely rejects the heroine here ends the fifth act.

The sixth act enters with the fisher man and police officers here we can see the master mind of the author. Kālidāsa The discovering of the ring and the disappearing of the curse it all happens in the sixth act. The name Abhijñāna Śākuntalam is well refined from this chapter. In this act the Vidūṣaka plays an important role,this chapteris about the king Duṣyanta's depression and regrets on his behavior towards the heroine, absent minded king gets in to a hallucination and he always blamed on himself for his unfair approach towards the innocent girl Śakuntala. In this situation the Mātali enters to inform Duṣyanta, that his friend Indra in crisis and he needs his help this really helps the king to get out of the stage suddenly the king leaves depression and wore the battle mask. Here the sixth act ends

Here starts the final act. The seventh act is the final act on the play Duṣyanta reunites with Śakuntala and his son. The final act shows the complete aesthetic ideas of Kālidāsa in the play. Here is a part in the play that Kālidāsa describes a breathtaking scene as king Duṣyanta takes flight.

शैलानामवरोहतीव शिखरादुन्मज्जतां मेदिनी
पर्णास्वान्तरलीनतां विजहति स्कन्धोदयात्पादपाः।
संतानैस्तनुभावनष्टसलिला व्यक्तिं भजन्त्यापगाः
केनाप्युत्क्षिपतेव पश्यभुवनं मत्पार्श्वमानीयते ॥[10]

In this sloka the author defines the beauty of the mountains from the up. The beauty of nature is well narrated in this sloka. The seventh act is the final act here Kālidāsa introduces their son Sarvadamana here also the author indicates many leading points which really matches that the

child is Śakuntala's and Duṣyanta's child, there also we can see the intelligence ofKālidāsa. There in the presence of great sage named Mārīca, king Duṣyanta and Śakuntala reunites and the play ends

**Conclusion**

Each act holds many emotions, characteristic feature, the connection between human and nature, human and animal and like many more. They all really well arranged in the play byKālidāsa. Everything shows the aesthetic experience in the play Abhijñānaśākuntalam, no need to say much the title of the play itself shows the aesthetic at the same time the intelligence approach of Kālidāsa towards words. One of the most peculiar features of Kālidāsa dramas were it all so much rich with words and its arrangements.Śākuntalamis one of his most popular one and everyone says it is one of the best Indian classical Drama, that's why it has the world wild recognition.Though, through the entire play Kālidāsa used his sense of beauty and the above noted areas were the aestheticparts which are mainly described in the play by the author. Kālidāsa always connects the characters with nature and emotions through the entire play it is clearly visible. The author used his aesthetic sense beautifully in the play, when it comes to Duṣyanta's entry or Śakuntala's introduction like any part the author just incredible used his aesthetic sense through sentences and slokas. So the Abhijñānaśākuntalam of Kālidāsa is always a considerable one in the field of aesthetic study and discussions.

**References**


1. SAK-ACT 1,Sloka 6
2. SAK-ACT 1,Sloka 14
3. SAK-ACT1, SLOKA-18
4. SAK-ACT2, SLOKA-19
5. SAK-ACT-4,SLOKA-6
6. SAK- ACT4, SLOKA-18
7. SAK-ACT4, SLOKA-22
8. SAK- ACT-4, SLOKA-14
9. SAK-ACT-5, SLOKA -13
10. SAK-ACT -7, SLOKA-8


**Bibliography**

**English**


1. Kale,M.R.,2006, The Abhijnanasakuntalam of Kalidasa, Delhi Motilal Banarsidass Publishers Private Limited.
2. Romila Thapar,2011,Sakuntala-Texts,Readings, Histories, Newyork, Columbia University Press.


**Malayalam**


3. Kutti Krishna Maarar,2005, Abhijnanasakuntalam: Kozhikod, Mathrubhumiprinting and Publication Company Limited.
4. Rajarajavarma, A.R. 2002, Malayala Shakuntalam: Mavelikara, A.R. RajarajaVarma Samarakam.

# लेखकेभ्यो निवेदनम्

पाणिनीयाशोधपत्रिकायाः प्रकाशनं प्रतिवर्षं जुलाई-अक्टोबर-जनवरी-अप्रैल-मासेषु सङ्कल्पितम्। लेखकाः अनुरुध्यन्ते कृपया स्वीयशोधपत्राणिmpsvv.paniniya@gmail.com इत्यत्र समयेन प्रेषयन्तु। शोधपत्रस्य भाषा संस्कृतं हिन्दी अंग्रेजी वा भवितुं शक्नोति।

शोधपत्रं (ए 4 साईज पृष्ठेषु) सामान्यतया पंचपृष्ठात्मकम् अपेक्षते। तच्च शुद्धतया टङ्कितं भवेत्।

पाणिनीया व्यावसायिकपत्रिका नास्ति। अतः लेखकाः, शोधार्थिनः, पाठकाः, प्राध्यापकाश्चानुरुध्यन्ते कृपया पत्रिकायाः न्यूनातिन्यूनं वार्षिकसदस्यतां स्वीकुर्वन्तु। वार्षिकसदस्यतायै 3000/- रुप्यकाणि निश्चितानि सन्ति। शुल्कम् अधोरीत्या दातुं शक्यते –

**NEFT माध्यमेन**

1. IFSC Code - BKID 0009103
2. Bank Name - Bank of India
3. Branch Name - Dashara Maidan, Ujjain
4. A/c. No. - 910310210000161
5. A/c. Name - Registrar Maharshi Panini Sanskrit evam Vedic Vishavidyalaya, Ujjain

   लेखस्य प्रकाशनार्थं स्वीकृति-अस्वीकृतिविषयकः अन्तिमः निर्णयः पुनरीक्षणसमितेः भविष्यति। स्वीकृतः लेखः यथापेक्षं परिष्कृतः भवितुमर्हति।

प्रकाशितशोधनिबन्धस्य विषयवस्तुगतप्रामाणिकतायै तस्य लेखकः एव उत्तरदायी भविष्यति न तु सम्पादकः प्रकाशको वा।

पत्रिकासम्बद्धस्य कस्यचिदपि विवादस्य न्यायिककेन्द्रं उज्जैनम् भविष्यति।


**Maharshi Panini Sanskrit Evam Vedic Vishwavidyalaya**

(Established by Government of Madhya Pradesh)

**Dewas Road, Ujjain (M.P.) INDIA**

**E-mail-regpsvvmp@rediffmail.com Website-www.mpsvv.ac.in**

पंचायतीराज मुद्रणालय, उज्जैन